## वृद्धिर्यस्याचामादिस्तद् वृद्धम् । (७३/१३३५)

यस्य इति समुदाय उच्यते। अचां मध्ये यस्य वृद्धिसञ्ज्ञक आदिभूतः, [1]तच्छब्दरूपं वृद्धसञ्ज्ञं भवति। अचाम् इति[2] जातौ[3] बहुवचनम्। शालीयः। मालीयः। औपगवीयः। कापटवीयः[4] (४.२.११४/१३३७)। आदिः इति किम्? सभासन्नयने भवः साभासन्नयनः (४.३.५३/१४२८)। (म.भा. १.१८९)

[१५] वा नामधेयस्य वृद्धसञ्ज्ञा वक्तव्या। (म.भा. १.१८९)

देवदत्तीयाः। दैवदत्ताः[5] (४.३.१२०/१५००)।

[१६] गोत्रान्तादसमस्तवत्प्रत्ययो भवतीति वक्तव्यम्। (म.भा. १.१९०)

घृतप्रधानो रौढिः घृतरौढिः। तस्य छात्रा घृतरौढीयाः। ओदनप्रधानः पाणिनिः ओदनपाणिनिः। तस्य छात्रा ओदनपाणिनीयाः। [6]वृद्धाम्भीयाः। [7]वृद्धकाश्यपीयाः।

[१७] जिह्वाकात्यहरितका[8]त्यवर्जम्। (म.भा. १.१९०)

जैह्वाकाताः। [9]हारितकाताः (४.३.१२०/१५००)॥

## त्यदादीनि च। (७४/१३३६)

यस्याचामादिग्रहणमुत्तरार्थमनुवर्तते। इह तु न सम्बध्यते। त्यदादीनि शब्दरूपाणि वृद्धसञ्ज्ञानि भवन्ति। [10]त्यदीयम्। तदीयम्। एतदीयम्। इदमीयम्। अदसीयम्। [11]त्वदीयम्। [12]त्वादायनिः (४.१.१५७/११८१)। मदीयम्। मादायनिः[13]। भवदीयम्। किमीयम्[14]॥

## एङ् प्राचां देशे। (७५/१३३८)

यस्याचामादिग्रहणम्[15]नुवर्तते। एङ यस्य अचामादिः तत्[16] प्राचां देशाभिधाने वृद्धसञ्ज्ञं भवति। [17]एणीपचनीयः। [18]भोजकटीयः। [19]गोनर्दीयः। एङ इति किम्? [20]आहिच्छत्रः। कान्यकुब्जः। प्राचाम् इति किम्? देवदत्तो नाम वाहीकेषु ग्रामः, तत्र [21]भवः दैवदत्तः। देशे इति किम्? गोमत्यां भवा मत्स्याः [22]गौमताः॥

प्रागुदञ्चौ विभजते हंसः क्षीरोदके[23] यथा।
विदुषां शब्दसिद्ध्यर्थं सा नः[24] पातु शरावती॥

इति [25]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः॥

---

1. तत् नास्ति ह, तत्प्रातिपदिकं ग. 2. निर्धारणे षष्ठी इत्यधिकम् फ. 3. चेदं इत्यधिकं अ. फ. 4. नास्ति फ. 5. दैवदत्तः ग. 6. वृद्धाम्बीयाः अ. 7. वृद्धकाश्यपेयः ग. 8. हरितका इत्येव वर्जम् ग. 9. हारीतकाताः ह. 10. यदीयं क. ड, त्यदीयः, ददीयः ग, तदीयम्, एतदीयम् इति न स्तः क, एतीयम् ग. 11. त्वदीयम्, मदीयम् न स्तः क. 12. त्वदायनिः मदायनिः ग. 13. उदिचां गोत्राद् इति फिञ् इत्यधिकम् ग. 14. एकीयम्, द्वीयम्, युष्मदीयम्, अस्मदीयम् इत्यधिकम् अ, त्यदादिः सर्वाद्यन्तर्गणः इति। अथ त्यदादिगणः–त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत्, किम् इति त्यदादिः ड. 15. इह इत्यधिकम् इ, इत्यनुवर्तते फ. 16. तच्छब्दरूपं ग. ह. 17. एणीपचनीयम् अ. ब, एनीपचनीयाः ह. 18. भोजकाटीयः ब, भोजकटीयम् ग. 19. गोनगरीयः अ. ड, गोनर्दीयम् ग, गोनदीयाः ह. 20. आहिच्छत्रम्, कान्यकुब्जम् ह. 21. तत्र भवं देवदत्तम् ह. 22. गोमत्याः क. 23. क्षीरोदकं क. ड. फ. ह. 24. पुनातु सरस्वती क. 25. जयादित्यकाशिकायां ई.